मानो गच्छत्यमरलोकताम्" मनुः ।

**अमरवल्ली** स्त्री अमरा उच्छेदनेऽपि न म्रियमाणा वल्ली । आकाशवल्ल्याम् (आलकलता) अमरलतादयोऽप्यत्र ।

**अमरसरित्** स्त्री ६त० । मन्दाकिन्यां गङ्गायाम् ।

**अमराङ्गना** स्त्री ६त० । "असुरःसु 'सुषाण रत्नानि हरामराङ्गनाः" माघः ।

**अमराद्रि** पु० ६त० । सुमेरौ । तत्स्थानञ्च । "लङ्का कुमध्ये यमकोटिरस्याः प्राक्पश्चिमे रोमकपत्तनञ्च । अधस्ततः सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये वडवानलश्च । इह हि मेरुगिरिः किल मध्यगः कनकरत्नमयस्त्रिदशालयः द्रुहिणजन्मकुपद्मककर्णिकेति च पुराविद इत्यमवर्णयन्" सि० शि० । अधिकं मेरुशब्दे भूगोलशब्दे च दृश्यम् ।

**अमराधिप** पु० ६त० । देवराजे इन्द्रे अमराधीशादयोऽप्यत्र

**अमरापगा** स्त्री ६त० । गङ्गायाम् । [नैष० ।

**अमरालय** पु० ६त० । स्वर्गे "तत्रामरालयमरालमरालकेशी"

**अमरावती** स्त्री अमरा विद्यन्तेऽस्यां मतुप् मस्य व दीर्घः । इन्द्रनगर्य्याम् । सा च मेरुपर्व्वतोपरिस्था "सद्रत्नकाञ्चनमयं शिखरत्रयञ्च मेरौ सुरारिकपुरारिपुराणि तेषु । तेषामधः शतमखज्वलनान्तकानां रक्षोऽम्बुपानिलशशीशपुराणि चाष्टौ" सि० शि० । एतद्वर्णनं भा० स० प० ७ अध्याये काशी० ख० १० अध्याये च दृश्यम् । "ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती" का० प्र० ।

**अमरिष्णु** त्रि० मृ—बा० इष्णुच् न० त० । मरणशीलभिन्ने "अनातुरा अजरास्थामरिष्णवः" ऋ० १०,९४,११ ।

**अमरु** पु० अमरुशतकग्रन्थकारके कविभेदे "कविरमरः कविरमरुः कविश्चौरो मयूरक" इत्युद्भटः ।

**अमरेश** पु० ६त० । देवराजे इन्द्रे अमरेश्वरादयोऽप्युक्तार्थे "अयममरेशदिशोमुखं सुधांशुः" सा० द० ।

**अमर्त्त** त्रि० मृ—तन् न० त० । मरणधर्म्मशून्ये "नृम्णानि च न्रतमानो अमर्त्तः" ऋ० ५,३३,६, "अमर्त्तः अमरणधर्म्मा" भा०

**अमर्त्त्य** त्रि० मर्त्तमर्हति यत् न० त० । मरणशून्ये "अग्ने ! विवस्वदुषसश्चित्रं राधो अमर्त्त्य !" ऋ० १,४४,१, "अमर्त्त्य ! मरणरहित" भा० "उत्क्रान्तवायुः समकालमेव अमर्त्त्यभावेऽपि कयोश्चिदासीत्" रघुः ।

**अमर्त्त्यभुवन** न० अमर्त्त्यानां देवानां भुवनम् । स्वर्गे ।

**अमर्य्याद** त्रि० नास्ति मर्य्यादा सीमा सम्मानो वा यत्र । १ सीमारहिते २ सम्मानरहिते च ।

**अमर्ष** पु० मृष—क्षान्तौ घञ् विरोधे न० त० । क्षमाविरुद्धे कोपे । "अमर्षशून्येन जनस्य जन्तुना न जातहार्द्देन न विद्विषादरः" किरा० तानेव सामर्षतया निजघ्नुः" रघुः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः" गीता ।

**अमर्षण** त्रि० मृष—ल्यु न०त० । १असहने २क्रोधने, च । "हृदि क्षतो गोत्रभिदाप्यमर्षणः" रघुः । अमर्षणोऽनयस्थायी विशालं कायलक्षणम्" । अमर्षणः स्वयं जेतुमशक्तः क्षत्रियोरणे भा० आ० प० । भावे ल्युट् । क्रोधे न० ।

**अमर्षित** त्रि० मृष—क्त इट् गुणश्च न०त० । क्रुद्धे "अस्त्रं प्रादुश्चकारोग्रं नारायणममर्षितः" भा० आदिप० ।

**अमर्षिन्** त्रि० मृष—णिनि न०त० । क्रुद्धे स्त्रियां ङीप् ।

**अमल** न० अम+कलच् । १ सातलाद्रव्ये २ अभ्रके च नास्ति मलं यस्य । ३निर्मले, दोषरहिते त्रि० "रसकलामलपल्लवलीलया" माघः "संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम्" "अमलकमलराशेस्त्र्यंशपञ्चांशषष्ठैः" लीला०

**अमलात्मन्** पु० अमलः रागादिदोषरहितत्वात् शुद्ध आत्मा अन्तःकरणं यस्य । निवृत्तरागादौ योगिनि । [३निर्बोधे च

**अमस** पु० अम—गतिरोगादौ असच् । १ काले २ रोगे

**अमलिन** त्रि० विरोधे न०त० । १मालिन्यशून्ये २निर्द्दोषे च "कुलममलिनं न त्वेवायं न च जीवितम्" माल० ।

**अमसृण** त्रि० विरोधे न०त० । चिक्कणभिन्ने रूक्षे ।

**अमा** अव्य० न+मा—का । १सहार्थे, "अमैवानः सुहवाः" ऋ० २,३६,२ । "अमा सह भा०" । अमावस्या । २निकटे च । न माति परिच्छिनत्ति क्षयोदयविशेषम् मा—क न०त० । सर्व्वकलाव्यापकतया स्थितायां चन्द्रस्य षोड़श्यां ३कलायाम् स्त्री "अमा षोड़शभागेन देवि ! प्रोक्ता महाकला संस्थिता परमा माया देहिनां देहधारिणी अमादिपौर्णमास्यन्ताया एव शशिनः कलाः । तिथयस्ताः समाख्याताः षोड़शैव वरानने !" इति स्का० प्रभा० ख० । व्याख्यातं चैतत् कालमाधवीये "महामाया आधारशक्तिरूपा देहिनां देहधारिणी सा चन्द्रमण्डलस्य षोड़शभागेन परिमिता चन्द्रदेहधारिणी अमानाम्नी महाकलेति प्रोक्ता क्षयोदयरहिता नित्या तिथिसंज्ञिकैव इतरा अपि पञ्चदश कला दिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः पञ्चदश तिथयो भवन्तीति तिथयः षोड़शैव एवञ्चात्र सामान्यविशेषरूपेण तिथिद्वैविध्यमुक्तं भवति । तत्र शेयम् अमेत्युक्ता क्षयोदयवर्ज्जिता ध्रुवा षोड़शी कला तदुक्तं कालस्तिथिसामान्यम् । यास्त्ववशिष्टा वृद्धिक्षयोपेताः पञ्चदश कलास्ताभिः विशिष्टकालविभागस्तिथिविशेष" इति । अधिकं तिथिशब्दे वक्ष्यते